1. महाभारतविकासस्य चरणानि सन्ति –

(a) 4 (b) 6 (c) 3 (d) 5

2. महाभारतं विभाजितम् –

(a) 18 पर्वसु (b) 28 पर्वसु (c) 38 पर्वसु (d) 08 पर्वसु

3. नैषधीयचरितमहाकाव्यस्य उपजीव्यमस्ति –

(a) महाभारतीयं सभापर्व (b) महाभारतीयं वनपर्व
(c) महाभारतीयं शान्तिपर्व (d) महाभारतीयम् उद्योगपर्व

4. आर्षकाव्यं कथ्यते –

(a) ऋषिप्रणीतं काव्यम् (b) कविप्रणीतं काव्यम्
(c) महाकविप्रणीतं काव्यम् (d) अलौकिकं काव्यम्

5. चतुर्विंशतिसाहस्रीसंहिता कथ्यते –

(a) आनन्दरामायणम् (b) वाल्मीकिरामायणम्
(c) रामचरितम् (d) रामचरितमानसम्

6. मेघदूतमस्ति –

(a) गद्यकाव्यम् (b) नाटकम् (c) महाकाव्यम् (d) खण्डकाव्यम्

7. गर्भाङ्कनाटकस्य योजना अस्ति –

(a) महावीरचरिते (b) अभिज्ञानशाकुन्तले (c) उत्तररामचरिते (d) रामचरिते

8. प्रकरणमस्ति –

(a) उत्सृष्टिकाङ्कः (b) मृच्छकटिकम् (c) भूपतिरहस्यम् (d) छायाचन्द्रम्

9. मुद्राराक्षसमस्ति –

(a) पुरुषरहितनाटकम् (b) प्रतीकनाटकम्
(c) विदूषकरहितनाटकम् (d) छायानाटकम्

10. 'गङ्गापुत्रावदानम्' – ग्रन्थस्य नायकोऽस्ति –

(a) स्वामी निगमानन्दः (b) सन्तज्ञानेश्वरः (c) स्वामी रामदेवः (d) गङ्गापुत्रभीष्मः

11. 'प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्' – इति कारिकांशः सम्बद्धः –

(a) महाकाव्यलक्षणेन (b) रूपकलक्षणेन (c) नाटकलक्षणेन (d) नाटिकालक्षणेन

12. बुद्धचरितमहाकाव्यस्य तृतीयसर्गस्य नाम –

(a) पुत्रोत्पत्तिः (b) संवेगोत्पत्तिः (c) स्त्रीनिवारणम् (d) कन्योत्पत्तिः

**13.** ‘अच्छोदसरोवर–वर्णनम्’ प्राप्यते –

(a) हर्षचरिते (b) चण्डीशतके

(c) कादम्बर्याम् (d) अभिज्ञानशाकुन्तले

**14.** ‘शिशुपालवधम्’ इत्यस्य महाकाव्यस्य उपजीव्यग्रन्थः अस्ति –

(a) रामायणम् (b) महाभारतम् (c) किरातार्जुनीयम् (d) नैषधीयचरितम्

**15.** नदीसञ्ज्ञकः नास्ति –

(a) नदी (b) गौरी (c) खलपूः (d) वधूः

**16.** ‘अदस्’ शब्दस्य पुंल्लिङ्गे षष्ठी–एकवचनस्य रूपं भवति –

(a) अमुष्य (b) अमुष्यै (c) अमुष्मै (d) अमुस्य

**17.** प्रगृह्यसञ्ज्ञा नास्ति –

(a) ईदन्तस्य (b) ऊदन्तस्य (c) अदन्तस्य (d) एदन्तस्य

**18.** निष्ठा सञ्ज्ञा अस्ति –

(a) क्त्वा (b) क्त (c) क्तिन् (d) क

**19.** ‘सुश्री’ शब्दस्य चतुर्थी–एकवचने रूपं भवति –

(a) सुश्रिया (b) सुश्रियः (c) सुश्रीभ्यः (d) सुश्रियै

**20.** ‘षट्’ शब्दस्य षष्ठी–बहुवचनस्य रूपं भवति –

(a) षण्णाम् (b) षट्नाम् (c) षड्नाम् (d) षट्णाम्

**21.** ‘तत्’ शब्दस्य स्त्रीलिङ्ग – षष्ठी–बहुवचने रूपमस्ति –

(a) तेषाम् (b) ताषाम् (c) तासाम् (d) तेसाम्

**22.** ‘सेव्’ धातोः लुङ्लकारस्य प्रथमपुरुषैकवचनस्य रूपमस्ति –

(a) असेविषीष्ट (b) असेविष्ट (c) सेविषीष्ट (d) असेवत

**23.** ‘त्यज्’ धातोः लिट्लकारस्य प्रथमपुरुष–बहुवचने रूपं भवति –

(a) तत्यजुः (b) त्यक्तारः (c) त्यजन्तु (d) तत्यज

**24.** ‘पर्णध्वत्’ इत्यत्र कः प्रत्ययः ?

(a) क्त (b) क्विप् (c) ध्वत् (d) वत्

**25.** ‘आकरः’ इत्यत्र प्रत्ययः अस्ति –

(a) घ (b) क (c) अ (d) उ

**26.** ‘शैवः’ इत्यत्र प्रत्ययः अस्ति –

(a) ष्यञ्  (b) अञ्  (c) अण्  (d) ठञ्

**27.** ‘रूपवद्भार्यः’ इत्यत्र समासोऽस्ति –

(a) द्वन्द्वः  (b) द्विगुः  (c) तत्पुरुषः  (d) बहुव्रीहिः

**28.** ‘अक्षशौण्डः’ इत्यत्र समासः –

(a) तत्पुरुषः  (b) द्वन्द्वः  (c) बहुव्रीहिः  (d) द्विगुः

**29.** ‘अध्यात्मम्’ इत्यस्य समस्तपदस्य विग्रहः –

(a) आत्मन्  (b) आत्मनि  (c) आत्मन्यात्मनि  (d) आत्मनोः

**30.** ‘कृष्ण + ऋद्धिः’ इत्यस्य सन्धिरूपं भवति –

(a) कृष्णार्द्धिः  (b) कृष्णाद्धिः  (c) कृष्णद्धिः  (d) कृष्णर्द्धिः

**31.** “लोप : .....” इत्यस्य अंशोऽस्ति –

(a) शाकटायनस्य  (b) चान्द्रायणस्य  (c) शाकल्यस्य  (d) स्फोटायनस्य

**32.** ‘हरये’ इत्यस्य सन्धिविच्छेदः अस्ति –

(a) हरे + ए  (b) हरे + य  (c) हरि + ए  (d) हर + अये

**33.** ‘अदेङ्गुणः’ अस्ति –

(a) अतिदेशसूत्रम्  (b) अधिकारसूत्रम्  (c) परिभाषासूत्रम्  (d) सञ्ज्ञासूत्रम

**34.** परवल्लिङ्गं ...

(a) द्विगु – द्वन्द्वयोः  (b) द्वन्द्व – कर्मधारयोः

(c) द्वन्द्व – तत्पुरुषयोः  (d) बहुव्रीहि – तत्पुरुषयोः

**35.** मेघदूते छन्दः वर्तते –

(a) स्रग्धरा  (b) मन्दाक्रान्ता  (c) भुजङ्गप्रयातम्  (d) शार्दूलविक्रीडितम्

**36.** शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति –

(a) ऊनविंशतिः  (b) विंशतिः  (c) एकविंशतिः  (d) द्वाविंशतिः

**37.** रघुवंशमहाकाव्ये सर्गाः सन्ति –

(a) 17  (b) 18  (c) 19  (d) 20

**38.** रत्नावलीनाटिकायाः नायकोऽस्ति –

(a) धीरोदात्तः  (b) धीरप्रशान्तः  (c) धीरोद्धतः  (d) धीरललितः

**39.** साहित्यदर्पणकारस्य मतौ नाटकस्य नायको भवति कश्चित् –

(a) राजकुलस्य (b) ब्राह्मणकुलस्य (c) वैश्यकुलस्य (d) अन्यकुलस्य

**40.** साहित्यदर्पणानुसारं रूपकाणि सन्ति –

(a) चत्वारि (b) पञ्च (c) षड् (d) दश

**41.** ‘विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः’ – इत्यत्र वर्तते –

(a) अलङ्कारविवेचनम् (b) गुणविवेचनम् (c) रसनिरूपणम् (d) भावविवेचनम्

**42.** साहित्यदर्पणकारानुसारं रसात्मकं वाक्यं किमस्ति ?

(a) पदम् (b) वाक्यम् (c) महावाक्यम् (d) काव्यम्

**43.** अभिधया शक्त्या कोऽर्थः बोध्यते ? –

(a) लक्ष्यार्थः (b) वाच्यार्थः (c) व्यंग्यार्थः (d) तात्पर्यार्थः

**44.** वेदान्तसारानुसारं वस्तुनि अवस्त्वारोपः कथ्यते –

(a) अज्ञानम् (b) विवर्तः (c) अपवादः (d) अध्यारोपः

**45.** तन्तुः पटं प्रति कारणमस्ति –

(a) निमित्तकारणम् (b) परस्परासम्बद्धम्

(c) समवायिकारणम् (d) असमवायिकारणम्

**46.** तर्कभाषानुसारं कस्मिन् प्रमाणे वस्तुद्वयस्य सादृश्यज्ञानं कारणं भवति ?

(a) शब्दप्रमाणे (b) अनुमानप्रमाणे (c) प्रत्यक्षप्रमाणे (d) उपमानप्रमाणे

**47.** ‘अग्निना सिञ्चेत्’ – इति वाक्यं नास्ति –

(a) परस्पराकाङ्क्षाविरहात् (b) योग्यताविरहात्

(c) परस्परसान्निध्याभावात् (d) उपमानाभावात्

**48.** वेदान्तसारानुसारम् आत्मा कया आच्छादितः –

(a) भावनया (b) विद्यया (c) अविद्यया (d) विद्याविद्यया

**49.** वेदान्तसारानुसारं जीवितावस्थायां समग्रकर्मबन्धनक्षयः भवति –

(a) देहमुक्तिः (b) इन्द्रियमुक्तिः (c) संसारमुक्तिः (d) जीवन्मुक्तिः

**50.** ‘वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च’ – वेदान्तस्य इयं परिभाषा केन कृता ?

(a) ईश्वरकृष्णेन (b) सदानन्देन (c) केशवमिश्रेण (d) मम्मटेन

**51.** सप्तभङ्गीनयः अथवा स्याद्वादसिद्धान्तः स्वीकृतः –

(a) जैनदर्शने (b) बौद्धदर्शने (c) न्यायदर्शने (d) वैशेषिकदर्शने

**52.** बौद्धदर्शने मोक्षार्थं प्रयुक्तः शब्दः –

(a) मुक्तिः (b) अपवर्गः (c) निर्वाणम् (d) कैवल्यम्

**53.** चत्वारः आर्यसत्याः केन स्वीकृताः ?

(a) महावीरेण (b) महात्मबुद्धेन (c) आचार्यकपिलेन (d) महर्षिगौतमेन

**54.** सांख्यदर्शने कैवल्यं परिभाषितं वर्तते –

(a) त्रिविधदुःखराहित्यत्वेन (b) त्रिविधदुःखैकान्तिकराहित्येन

(c) त्रिविधदुःखात्यन्तिकराहित्येन (d) त्रिविधदुःखैकान्तिकात्यन्तिकराहित्येन

**55.** 'सृष्टेः कारणं प्रकृति–पुरुषौ स्तः' – इति कस्य मतम् ? –

(a) सांख्यदर्शनस्य (b) बौद्धदर्शनस्य (c) जैनदर्शनस्य (d) न्यायदर्शनस्य

**56.** सत्कार्यवादस्य सिद्ध्यर्थं सांख्यदर्शनसम्मतानि प्रमाणानि सन्ति –

(a) 04 (b) 05 (c) 06 (d) 03

**57.** संघातपरार्थत्वादित्युक्तितः सिध्यति –

(a) प्रकृतिरस्ति (b) गुणाः सन्ति (c) पुरुषोऽस्ति (d) दोषाः सन्ति

**58.** सांख्यकारिकानुसारं प्रकृतिर्वर्तते –

(a) जडरूपा (b) चेतनरूपा (c) स्वप्नरूपा (d) सुप्तरूपा

**59.** सांख्यकारिकानुसारं पञ्चभूतानि जायन्ते –

(a) महतः (b) अहङ्कारात् (c) मनसः (d) पञ्चतन्मात्राभ्यः

**60.** ऋग्वेदस्य मन्त्राः विभक्ताः सन्ति निम्नमण्डलेषु –

(a) 08 मण्डलेषु (b) 10 मण्डलेषु (c) 14 मण्डलेषु (d) 06 मण्डलेषु

**61.** 'वेदानां रचनाकालोऽस्ति 6,000 ई.पू.' इत्यस्य मतस्य प्रतिपादकः –

(a) विन्टरनिट्ज़ (b) मैकडॉनल

(c) बलदेव–उपाध्यायः (d) बालगङ्गाधरतिलकः

**62.** सविता कस्य लोकस्य देवता अस्ति ?

(a) अन्तरीक्षलोकस्य (b) पृथिवीलोकस्य

(c) द्युलोकस्य (d) अधोलोकस्य

**63.** वेदाङ्गानि कति ? –

(a) चत्वारि (b) पञ्च (c) षट् (d) त्रीणि

**64.** 'य आत्मदा बलदा यस्य प्रशिषं विश्वे देवाः उपासते' – सः अस्ति –

(a) पुरुषः (b) हिरण्यगर्भः (c) अग्निः (d) विष्णुः

**65.** निरुक्तस्य प्रतिपाद्य – विषयोऽस्ति –

(a) वर्णागमः (b) उच्चारणम् (c) प्रत्ययज्ञानम् (d) छन्दोज्ञानम्

**66.** षोडशसंस्काराः कस्य विषयाः सन्ति ?

(a) धर्मसूत्रस्य (b) गृह्यसूत्रस्य (c) श्रौतसूत्रस्य (d) शुल्बसूत्रस्य

**67.** यास्कानुसारं नाम्नः लक्षणमस्ति –

(a) असत्त्वप्रधानानि नामानि (b) सत्त्वाप्रधानानि नामानि

(c) आख्यातप्रधानानि नामानि (d) सत्त्वप्रधानानि नामानि

**68.** 'मघवा' इति कस्य देवतायाः उपाधिः ?

(a) इन्द्रस्य (b) सवितुः (c) उषसः (d) रुद्रस्य

**69.** ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्ते यज्ञस्य देवः कः ?

(a) इन्द्रः (b) सूर्यः (c) प्रजापतिः (d) अग्निः

**70.** नासदीयसूक्तस्य ऋषिः अस्ति –

(a) परमेष्ठी प्रजापतिः (b) याज्ञवल्क्यः (c) हिरण्यस्तूपः (d) विश्वामित्रः

**71.** 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' अयं मन्त्रांशः उद्धृतः अस्ति –

(a) कठोपनिषदः (b) ईशोपनिषदः (c) केनोपनिषदः (d) प्रश्नोपनिषदः

**72.** दशकुमारचरितस्य पूर्वपीठिकायाम् उच्छ्वासाः सन्ति –

(a) 02 (b) 04 (c) 05 (d) 10

**73.** हरिनारायणदीक्षितस्य रचना अस्ति –

(a) महावीरचरितम् (b) विक्रमाङ्कदेवचरितम्

(c) भीष्मचरितम् (d) इन्दिराचरितम्

**74.** कस्य नाटकस्य उपजीव्यं रामायणं नास्ति ?

(a) बालभारतस्य (b) अभिषेकनाटकस्य (c) कुन्दमालायाः (d) आश्चर्यचूडामणेः

**75.** 'सर्गश्च प्रतिसर्गश्च … पुराणं पञ्च लक्षणम्' – इति उद्धृतम् –

(a) वायुपुराणे (b) विष्णुपुराणे (c) पद्मपुराणे (d) स्कन्दपुराणे

76. संस्कृतसाहित्ये 'पदलालित्यवती' प्रसिद्धा रचना अस्ति –

(a) किरातार्जुनीयम् (b) शिशुपालवधम् (c) नैषधीयचरितम् (d) हर्षचरितम्

77. मनुस्मृतेः कस्मिन् अध्याये चतुर्वर्णानां कर्मणां व्यवस्था प्रतिपादिता ?

(a) प्रथमाध्याये (b) द्वितीयाध्याये (c) तृतीयाध्याये (d) चतुर्थाध्याये

78. याज्ञवल्क्यस्मृतौ व्यवहारस्य कति भेदाः ?

(a) पञ्चदश (b) षोडश (c) सप्तदश (d) अष्टादश

79. उपमार्थे प्रयुक्ताः निपाताः –

(a) इव, न, चित्, नु
(b) इव, ननु, चित्, नु
(c) इव, नु, सु, न
(d) इव, एव, तु, नु

80. अधोलिखितेषु 'निघण्टु' शब्दस्य कतमं निर्वचनं नास्ति ?

(a) निगमा इमे भवन्ति
(b) समाहर्ता भवति
(c) समाहृता भवन्ति
(d) समाहता भवन्ति

81. अधोलिखितेषु 'आचार्य' शब्दस्य कतमं निर्वचनं नास्ति ?

(a) आचारं ग्राहयति
(b) आचिनोति अर्थान्
(c) आचिनोति धर्मान्
(d) आचिनोति बुद्धिम् इति वा

82. षड्भावविकारो नास्ति –

(a) वर्धते (b) अस्ति (c) अपक्षीयते (d) नास्ति

83. यदक्षरपरिमाणं तत् किम् ?

(a) व्याकरणम् (b) छन्दः (c) शिक्षा (d) निरुक्तम्

84. वेदार्थानां निर्णये कस्य भाष्यम् अद्यापि प्रमाणरूपेण स्वीक्रियते ?

(a) मैक्समूलरस्य (b) कीथमहोदयस्य (c) सायणाचार्यस्य (d) मम्मटाचार्यस्य

85. वैदिकसंस्कृते सन्धिनियमः दृश्यते –

(a) ऐच्छिकः (b) अनिवार्यः (c) कठिनः (d) आवश्यकः

86. अधोलिखितेषु 'धि' – संज्ञकोऽस्ति –

(a) गौरी (b) वधू (c) सखि (d) हरि

87. 'विद्वाँल्लिखति' इत्यत्र सन्धिविधायकं सूत्रमस्ति –

(a) मोऽनुस्वारः
(b) तोर्लिः
(c) यरोऽनुनासिकेऽनुनासिको वा
(d) आदेः परस्य

88. 'सत् + चित् = सच्चित् – इत्यत्र सन्धिविधायकं सूत्रमस्ति –

(a) छे च (b) खरि च (c) स्तोः श्चुना श्चुः (d) ष्टुना ष्टुः

89. 'विष्णुस्त्राता' – अत्र सन्धिविधायकं सूत्रमस्ति –

(a) खरवसानयोर्विसर्जनीयः (b) विसर्जनीयस्य सः
(c) वा शरि (d) ससजुषो रुः

90. 'वेदोऽखिलो धर्ममूलम्' इति वाक्यं कुत्र ?

(a) वेदे (b) ब्राह्मणसाहित्ये (c) याज्ञवल्क्यस्मृतौ (d) मनुस्मृतौ

91. कौटिल्यसम्मताः विद्याः –

(a) चतस्रः (b) तिस्रः (c) द्वे (d) एका

92. याज्ञवल्क्यानुसारम् ऋणादानं कतिविधम् ?

(a) पञ्चविधम् (b) षड्विधम् (c) सप्तविधम् (d) चतुर्विधम्

93. कृष्णयजुर्वेदस्य शाखा नास्ति –

(a) तैत्तिरीय (b) मैत्रायणी (c) कठ (d) काण्व

94. ऐतरेय–आरण्यकं केन वेदेन सम्बद्धम् ?

(a) ऋग्वेदेन (b) यजुर्वेदेन (c) सामवेदेन (d) अथर्ववेदेन

95. शुक्लयजुर्वेदस्य ब्राह्मणग्रन्थोऽस्ति –

(a) गोपथब्राह्मणम् (b) जैमिनीयब्राह्मणम् (c) शतपथब्राह्मणम् (d) ऐतरेयब्राह्मणम्

96. अभिज्ञानशाकुन्तलस्य नायकोऽस्ति –

(a) धीरप्रशान्तः (b) धीरोदात्तः (c) धीरोद्धतः (d) धीरललितः

97. विश्वनाथेन खण्डितम् आचार्यवामनस्य काव्यलक्षणं किम् ?

(a) काव्यस्यात्मा ध्वनिः (b) वक्रोक्तिः काव्यजीवितम्
(c) रीतिरात्मा काव्यस्य (d) तददोषौ शब्दार्थौ …

98. सम्बोधने विभक्तिर्भवति –

(a) अष्टमी (b) प्रथमा (c) तृतीया (d) सप्तमी

99. 'तिलेषु तैलम्' – इत्युदाहरणे 'तिलेषु' इत्यत्र आधारोऽस्ति –

(a) अभिव्यापकः (b) औपश्लेषिकः
(c) वैषयिकः (d) उपर्युक्तेषु न कोऽपि

100. सुषारथिः अश्वानिव मनुष्यान् किं नेनीयते ?

(a) आत्मा (b) इन्द्रियाणि (c) मनः (d) शक्तिः